# संस्कृतवार्ता:

दिनाङ्क :-29.12.2024 प्रात: - 06:55

इयम् आकाशवाणी

प्रधानमन्त्री -मन की बात कार्यक्रम:

प्रधानमन्त्री नरेन्द्रमोदी अस्य अद्य आकाशवाण्या: 'मन की बात' इत्यस्मिन् कार्यक्रमे जनैस्सह स्वविचारान् विनिमयी-करिष्यति। इदं मासिक-रेडियो-कार्यक्रमस्य सप्तदशाधिकै- कशततमं संस्करणं भविष्यति। कार्यक्रमस्य प्रसारणम् आकाशवाण्यां, दूरदर्शने, AIR News वेबफलके, Newsonair इति दूरभाष-तन्त्रांशे च भविष्यति। अयं कार्यक्रमः आकाशवाणी-दूरदर्शन-प्रधानमन्त्री-कार्यालय-सूचनाप्रसारण-मन्त्रालयानां यूट्यूब-वाहिनीष्वपि द्रष्टुं शक्यते। हिन्दी- प्रसारणानन्तरं क्षेत्रीयभाषासु च अस्य कार्यक्रमस्य प्रसारणं भविष्यति।

---------------------------------------------

राजमार्ग एनएच-44-इति-

श्रीनगरजम्मूराष्ट्रीयराजमार्गः एनएच-चतुश्चत्वारिंशत् इति हिमसञ्चयेन पिहित: अस्ति । यातायातविभागस्य प्रवक्ता उक्तवान् यत् राजमार्गे उभयपक्षतः यातायात सुविधा स्थगिता अस्ति। प्रातःकाले मार्गस्थितिं अवलोक्य यातायात-पुनर्स्थापनस्य समीक्षा भविष्यति। अयं राजमार्ग: दक्षिणकश्मीरस्य शोपियान्-मण्डलं जम्मूक्षेत्रस्य राजौरी-पून्च-मण्डलेन सह संयोजयति, श्रीनगरलेहराजमार्गः मुगलमार्गः चापि अद्य हिमसञ्चयेन पिहित: अस्ति।

---------------------------------------------

कृष्णाङ्गार उत्पादनम्

भारतेन त्रयोविंशत्यधिक द्विसहस्र-चतुर्विंशत्यधिक द्विसहस्रतम वर्षयोः अधुनापर्यन्तं सर्वाधिकं कृष्णाङ्गारोत्पादनं दृष्टम्। त्रयोविंशत्यधिक द्विसहस्र-चतुर्विंशत्यधिक द्विसहस्रतम वर्षयोः अखिले हि भारते कृष्णाङ्गारस्य उत्पादनं सप्तनवत्यधिक नवशत दशमलव षड्विंशत्यधिक अष्टशतं मिलियन टन परिमितम् आसीत्, तत्रैव विगतवर्षे त्रिणवत्यधिक अष्टशत दशमलव एक नवत्यधिकैक शतं मिलियन टन परिमितम् आसीत् यस्मिन् प्रायः एकादश दशमलव एकसप्ततिः प्रतिशतं यावत् वृद्धिः जाता। कृष्णाङ्गारमन्त्रालयेन सूचितं यत् देशेन अस्य मासस्य पञ्चदश दिनाङ्कपर्यन्तं देशे प्रायः त्रिषष्ट्युत्तर नवशत दशमलव एकादश मेट्रिकटन परिमितं यावत् कृष्णाङ्गारस्य आपूर्तिः कृता अस्ति।

---

**इस्रो-स्पैडेक्सः**

भारतीय-अन्तरिक्ष-अनुसन्धान-सङ्गठनम् श्वः स्वस्य अन्तरिक्ष-डॉकिंग्-प्रयोगस्य, SpaDeX-इत्यस्य प्रारम्भं करिष्यति। एकस्मिन् साक्षात्कारे अन्तरिक्षराज्यमन्त्री डॉ. जितेन्द्रसिंहः अवदत् यत् इसरो इत्यस्य वर्षान्त- अभियानं ऐतिहासिकं भविष्यति। अनेन प्रयोगेण अन्तरिक्षे उपग्रहद्वयं डॉकिंग् इति विलीनीकरणस्य दुर्लभं पराक्रमं अन्वेषयिष्यति। डॉ. सिंहः अवदत् यत् स्पैडेक्स-इत्यानने अभियनेन भारतस्य अन्तरिक्ष-डॉकिंग् इत्यस्मिन्-विषये निपुणतां प्राप्तुं समर्थानां राष्ट्राणां अनन्य- श्रेण्यां प्रवेशः भविष्यति।

---

**हिमाचल प्रदेश-ऋतुविज्ञान:**

हिमाचल-प्रदेशे बहुषु-क्षेत्रेषु हिमपात:, वृष्टि: च सञ्जायते। किन्नौर-जनपदस्य लोकप्रिय-पर्यटन-स्थले चितकुले बृहन्मात्रिक हिमपात: सञ्जात:। लाहौल-स्पीति-इत्यस्य क्षेत्रस्य उच्चतम-पर्वतीय-स्थलेषु भीषण-हिमपात: जात:। एतदतिरिच्य, चम्बा-जनपदस्य जनजातीय-क्षेत्रयो: पांगी, भरमौर इत्येतयो: भीषण-हिमपात: आकलित:। प्रशासनेन जनै: अनावश्यक-यात्रा नैव करणाय अध्यर्थिता:। अखिल उत्तर-भारते शीतलहर्य्या: प्रभाव: दरीदृश्यते। उत्तराखण्डस्य पर्वतीय-क्षेत्रेषु बहुषु-स्थानेषु हिमपात: सूचित:। अस्मदीय-वार्ताहरेण सूचित: यत् अत्यधिक-उच्चतम-पर्वतीयक्षेत्रेषु भीषण-हिमपात: सञ्जात:।

---

**संस्कृत-साप्ताहिकी**

प्रिया: श्रोतार:, संस्कृतजगता सम्बद्धै: विभिन्नै: क्रियाकलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ.एम.गोल्ड-प्रवाहिकात: अद्य मध्याह्ने सार्धैक-वादनत: भविष्यति। कृपया श्रृण्वन्तु।

।।इति वार्ता:।।